## 6.1.3.

**संस्थया प्रशासने/प्रबन्धने/सञ्चिकानामुपरिटिप्पणीलेखने/सूचनाफलकस्योपरि कार्यालयीयसूचनासु/शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु वा माध्यमरूपेण संस्कृतभाषा स्वीकृता**

Answer:

अथ संस्कृतभाषायाः सर्वतोमुखविकासाय आभारतं संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण 1791 तमस्य चैत्र मासस्य चैत्रशुक्लप्रतिपदि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः प्रतिष्ठापितः। अस्मिन् विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां विनियमानाञ्च अधिकाधिकानि संस्कृतरूपान्तराणि सम्पादितानि । तेषु कानिचन जालपुटे आरोपितानि सन्ति। विश्वविद्यालयस्य जालपुटे एतद्विषयकं विवरणमपि अस्ति। एवं प्रशासने, प्रबन्धने, सञ्चिकानामुपरि टिप्पणीलेखने, सूचनाफलकस्योपरि , कार्यालयीयसूचनासु, शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु च मुख्यमाध्यमरूपेण संस्कृतभाषा स्वीकृता विभागेषु वर्तते। सर्वेषु संस्कृतमाध्यमेन अधिकाधिकाः सूचनाः प्रसार्यन्ते। अधिकाधिकाः कार्यालयीयकर्मचारिणश्च संस्कृतेन व्यवहर्तुं लेखितुं च प्रभवन्ति। अतः कार्यालयीयसूचनाः स्थानीयपरिवेषानुगुणं संस्कृतेन प्रादेशिकभाषासु च प्रसार्यन्ते। छात्रसम्बद्धाः शैक्षकक्रियाकलापानां सम्बद्धाः सूचनाः अधिकाधिकाः संस्कृतेन सह हिन्द्याम् , प्रसार्यन्ते। सूचना प्रसाराय शब्दपरिचयाय पञ्चाङ्गपठनाय योग्यानि फलकानि तत्र तत्र सन्ति।

स्वोद्देश्यस्य प्राप्त्यर्थं सर्वकारस्य विभिन्नयोजनानाम्ध्कार्यक्रमाणां निष्पादनाय विश्वविद्यालयः अधोलिखितगतिविधीन् संचालयति।

1. माध्यमिक– पूर्वस्नातक–स्नातक–स्नातकोत्तर–विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।

2. स्नातक–(शिक्षाशास्त्री/बि.एड्.)स्नातकोत्तर–(शिक्षाचार्य/एम.एड्.)स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।

3. संस्कृतस्य विभिन्नविषयेषु शोधकार्यार्थं प्रोत्साहनम्।

4. संस्कृतस्य प्रचाराय राज्यशासनस्य योजनानां कार्यान्वयम्।

5. संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयस्य स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णयोग्यपुस्तकानां प्रकाशनम्

एवमेव दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते।अधिकाधिकानां प्रलेखानां

संस्कृतरूपान्तरणस्य कार्यम् अद्यावधि सम्पादितमस्ति ।

लक्ष्यम् उद्देश्यानि च संस्कृतभाषायाम् अनूद्य जालपुटे स्थापितानि सन्ति । यथा –

**1. परम्परागतमाध्यमेन माध्यमिक–स्नातक–स्नातकोत्तर–विद्यावारिधिस्तरेषु अध्यापनम् –**

उपषट्शतानि स्वयंसेविसंस्कृतसंस्थाश्च विश्वविद्यालयेन सम्बद्धाः सन्ति।

इत्यादय 36 विषयाः विभागाश्च तत्र इमे विभागाः विलसन्ति यथा दृ साहित्यविभागः , न्यायविभागः , व्याकरणविभागः , धर्मशास्त्रविभागः , पुराणेतिहासविभागः , अद्वैतवेदान्तविभागः , जैनदर्शनविभागः , नव्यन्यायविभागः , साङ्ख्ययोगविभागः , मीमांसाविभागः वेदविभागः ज्यौतिषविभागश्चेत्यादयः सन्ति । विभागीयसूचनाः अधिकाधिकाः संस्कृतेन निर्गच्छन्ति। सर्वाणि अनुसन्धानकार्याणि संस्कृतमाध्यमेन एव जायन्ते। बृहत्पुस्तकालयोऽपि विश्वविद्यालयीय वर्तते यत्र सर्वशास्त्रसम्बद्धानि पुस्तकानि तथैव पाण्डुलिपयः , ताडपत्राणि,भूर्जपत्राणि च विद्यन्ते।

**2. स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्**

प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे संस्कृतेन प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः संस्थानेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

**3. विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्**

विश्वविद्यालये बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः प्रदीयते तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते ।

**4. विशिष्टपाण्डुलिपिग्रन्थानां शोधग्रन्थानाञ्च प्रकाशनम्**

विश्वविद्यालयः विभिन्नैः विद्वद्भिः सुष्ठु सम्पादितानां विविधानां पाण्डुलिपिग्रन्थानाम्, शोधग्रन्थानां च प्रकाशनं करोति ।

5.वाक्यार्थसभा / शास्त्रार्थसभा / सरलमानकसंस्कृतभाषणाभ्यासः / युवमहोत्सवः / प्रत्यक्षानुभवाय पर्टनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रत्येकं विभागेन प्रतिमासं वाक्याथसभा स्वस्वविभागेषु आयोज्यते यथा व्याकरणविभागेन त्रयोदशी सभा इति, ज्योतिषविभागेन वाग्वधिनी सभा इत्यादि रीत्या आयोज्यते।

6.एकमेव च सर्वे विभागाः मिलित्वा मासिकवाक्यार्थ सभां परिसरस्य वाग्देवीमन्दिरे प्रचालयन्ति। तस्मिन् विश्वविद्यालयीयछात्राः सर्वे भागं गृहीत्वा स्वकीय विषयं उपस्यापर्यन्ति।

7.2019, वत्सरे जुलै मासे प्रो0 राजाराम शुक्ल महोदयानां कुलपतिनां निर्वहणे अन्तराष्ट्रियशास्त्रार्थ सभा शताब्दीभवने आयोजीता। अस्मिन् कार्यक्रमे देवविदेशेभ्यः अनेके पण्डिताः (रिसोर्स परसनः) आगत्य छात्रान् उद्बोधितवन्तः।

8.एवमेव विश्वविद्यालयीय शिक्षाशास्त्री विभागेन सरलमानकभाषाभाषणसामर्थ्यस्य अभिवृध्यर्थं संस्कृतसं भाषण स्पधा, संस्कृतसं भाषण शिबिरादि कार्यक्रमा संचाल्यन्ते।

9.भारतीयंज्ञानवैभव समुल्लसः इति शीर्षकोपेतः Online कार्यक्रम प्रतिगुरूवासरं 7 वादनप्रभृति 8:30 वादन पर्यन्तं जूमम ाध्यमेन प्रचलित। अत्र देशस्य विभिन्नविश्वविद्यालयेभ्यः अध्यापकाः आगत्य विभिन्न विषयेषु छात्रान् उद्बोधयन्ति। अत्र औत्सहिनः अनेके छात्राः भागं मृहीत्वा प्रयोजनं लभन्ते।

10.छात्र कल्याणसंकाय द्वारा करोनाकालं मुक्त्वा प्रायः प्रतिवत्सरं युवसमारोहः आयेज्यते। अत्र अन्त्ज्याक्षरादि कलाः, ललितकलाः, काव्यलेखनादि, क्रीडाडि विषनान् स्वीकृत्य स्पर्धाः भवन्ति।

11.प्रो0 हरि प्रसाद अधिकारी महोदयानां (तुलनात्मक धर्मदर्शनसंकाय) द्वारा अेनेके छात्राः काव्यलेखन शिक्षणे शिक्षणं स्वीकृवन्ति।

12.विश्वविद्यालये संगणकस्यत लैब निर्मितमस्ति तत्र संगणक विज्ञानं, पुस्तकाशनाय अपेक्षितविज्ञानं, प्रतिकृति संम्पाडनार्थं (प्रुफ रीडिंग) शिक्षण दीयते।

13.एवमेव विश्वविद्यालस्य अनेके छात्राः इदानीं भागवतादिपुराणवाचकाः भूत्वा स्वकीयं धर्मप्रचारं कुर्वन्ति तदर्थं पुराणेतिहासविभागः विशेषशिक्षां ददाति।

14.विश्वविद्यालस्य छात्रा सांस्कृतिक पर्यटनाय अनेकान् मन्दिरान् गत्वा तत्रत्य पौरोहित्यकर्मकाण्डयोः अनुशीलनं कुर्वन्ति एवमेव शिक्षाशास्त्रविभागपक्षतः अपि प्रत्याक्षानुभवार्थ छात्राः अनेकपर्यटनस्थलेषु नीयन्ते।

15.अत्र दीक्षान्तसमारोहे माहमहिमराज्यपालनां, एवं कुलपतीनां, सर्वेषां संकायाध्यक्षानां च भाषणं नियतरूपेण सरलामानकसंस्कृतभाषयैव भवति। तानि सर्वाण्यपि भाषणानि प्रकाशनविभागद्वारा प्रकाश्यन्ते च।

16.प्रातः सायं च विश्वविद्यालयस्य परिसरे ऑडियो माध्यमेन सरलसंस्कृतश्लोकाः, सुभाषितश्लोकाः, विष्णुसहस्रनामस्तोत्रंख ललितसहस्रनामस्तोत्रं, तोटकाष्टकम् , गुरूवन्दनश्लोक, छात्राणां कृते श्राव्यन्ते।

17.विश्वविद्यालस्य गेयगीमपि सरलमानकसंस्कृतभाषायां निर्मितमस्ति। तस्य गेयस्य विनियोगः सर्वविधकार्यक्रमेषु छात्राः गायन्ति– ''इहैव स्थिता भावना भारतीया'' इति गीतिकायाः शीर्षकं वर्तते।

18.शैक्षणातिरिक्तविभागीयजनाः कर्मचारिणः अपि विश्वविद्यालये क्रमेण संरलमानकसंस्कृतभाषामेव भाषणं कुर्वन्ति इत्यापि महान् संस्कृतलोकस्य मोदावहोविषयः।

19.विश्वविद्यालस्य केचन् विशिष्टाः अध्यापकाः विश्वविद्यालयकक्षानन्तरं स्वगृहेषु संस्कृतभाषा–भाषण–प्रतिशक्षणं ददति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये बहोःकालात् अयं संप्रदायः अनुवर्तमानो इति।